आनुष्टुभं मन्त्रराजं सहस्रं प्रजजाप ह ॥
वैशाखस्यामले पक्षे अष्टम्यां पुष्ययोगतः ।
कृता प्रतिष्ठा भो विप्राः शोभने गुरुवासरे ॥”
तन्महाप्रसादमाहात्म्यं यथा,—
“बहून् नियोजयेत्तत्र लोकान् चैवगिंकानुत ।
लौकिकव्यवहारोऽयं पचति श्रीः स्वयं ध्रुवम् ।
भुङ्क्ते नारायणो नित्यं तथा पक्वं शरीरवान् ॥
अन्नतं तद्धि नैवेद्यं पापघ्नं स्मृद्धिं धारणात् ।
भक्षणान्मद्यपानादिमहादुरितनाशनम् ॥
आघ्राणाज्जानसं पापं दर्शनाद्दृष्टिजं तथा ।
आस्वादाद्वाक्कृतं पापं श्रावणञ्च व्यपोहति ॥
स्पर्शनात् त्वक्कृतं पापं मिथ्यालापं तथा द्विजाः ॥
मान्ने लेपाद्धरेत् पापं शारीरं वै न संशयः ॥

महापवित्रं हि हरेर्निवेदितं
नियोजयेद्यः पितृदेवकर्म्मसु ।
तृप्यन्ति तस्मै पितरः सुराश्च
प्रयान्ति लोकं मधुसूदनस्य ॥

नातः परं हि वस्त्वस्ति हृद्यकथ्येषु भो द्विजाः ॥
नराणां रूपमास्थाय तदश्नन्ति दिवौकसः ॥
विष्णालयगतं तद्धि निर्म्माल्यं पतितादयः ।
स्पृशन्ति चेन्न दुष्टं हि यथा विष्णुस्तथैव तत् ॥
निन्दन्ति ये तदन्नतं मूढाः पण्डितमानिनः ।
स्वयं दण्डधरस्तेषु सहते नापराधिनः ॥
येषामत्र न दण्डश्चेद्ध्रुवा तेषां हि दुर्गतिः ।
कुम्भीपाके महाघोरे पच्यन्ते तेऽतिदारुणे ॥
चिरस्थमपि संशुष्कं नीतं वा दूरदेशतः ।
यथा तथोपयुक्तं तत् सर्व्वपापापनोदनम् ॥
नैवेद्यान्नं जगन्नाथुर्गाङ्गं वारि समं द्वयम् ।
हरिस्पर्शनचिन्ताभिर्भक्षणादघनाशनम् ॥”
इत्युत्कलखण्डम् ॥ * ॥

स च कलेर्दशसहस्रवर्षपर्य्यन्तं पृथिव्यां स्थास्यति। यथा,—
“शालग्रामो हरेर्मूर्त्तिर्जगन्नाथश्च भारतम् ।
कलेर्दशसहस्रान्ते ययौ त्यक्त्वा हरेः पदम् ॥”
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डम् ॥

( स्वनामख्यातो बहुग्रन्थकर्त्ता पण्डितविशेषः । अयं हि तैलङ्गवंशोद्भवः । अस्य पिता पेरमभट्ट इति ख्यातः । असौ पण्डितराजजगन्नाथो दिल्लीप्रभोः शाहजहान्-ज्येष्ठसूनोर्यवनस्य दाराशाहस्य सभायामासीत् । यतोऽनेन जगदाभरणकाव्ये दाराशाहस्यैव यशोवर्णनं कृतम् । अपिच भामिनीविलाससमाप्तौ “दिल्लीवल्लभपाणिपल्लवतले नीतं नवीनं वयः” इत्युक्तम् । दाराशाहस्तु १५८१ एकाशीत्यधिकपञ्चदशशतशकाब्दपर्य्यन्तं जीवित आसीत् । अतः पण्डितराजजगन्नाथोऽयं तात्कालिक इत्येवायातम् । अनेन पण्डितराजपदवी शाहजहान्नाम्नो दिल्लीप्रभोः प्राप्तेति तत्कृतादासफविलासनामकग्रन्थादेवागम्यते यथा,—
“अथ सकललोकविस्तारविस्तारितमहोपकारपरम्पराधीनमानसेन प्रतिदिनमुदयदनवद्यगद्यपद्याद्यनेकविद्याविद्योतितान्तःकरणैः कविभिरुपास्यमानेन कृतयुगीकृतकलिकालेन कुमतितृणजालसमाच्छादितवेदवनमार्गविलोकनाय समुद्दीपितसुतर्कदहनज्वालाजालेन मूर्त्तिमतेव नव्वावासफखानमनःप्रसादेन माथुरकुलसमुद्रेन्दुना रायमुकुन्देनादिष्टेन सार्व्वभौमश्रीशाहजानुप्रसादाधिगतपण्डितराजपदवीविराजितेन तैलङ्गकुलावतंसेन पण्डितजगन्नाथेनासफविलासाख्येयमाख्यायिका निरमीयत। सेयमनुग्रहेण सहृदयानामनुदिनमुल्लासिता भवतात् ॥”

एतत्पण्डितविरचिता बहवो ग्रन्थाः सन्ति । तेषु अद्यावधि ज्ञातास्त्वेते, रसगङ्गाधरः १, यमुनावर्णनचम्पूः २, रतिमन्मथनाटकम् ३, वसुमतीपरिणयनाटकम् ४, जगदाभरणकाव्यम् ५, प्राणाभरणकाव्यम् (कामरूपदेशाधिपस्य प्राणनारायणमहीपस्य स्तुतिरूपोऽयं ग्रन्थः ) ६, पीयूषलहरी ७, अमृतलहरी ( यमुनास्तुतिरूपोऽयं ग्रन्थः ) ८, सुधालहरी ( सूर्य्यस्तवरूपोऽयं ग्रन्थः ) ९, करुणालहरी ( विष्णुलहरी वा ) १०, लक्ष्मीलहरी ११, भामिनीविलासः १२, मनोरमाकुचमर्द्दिनी १३, अश्वधाटीकाव्यम् १४, आसफविलासः १५ ॥ * ॥

तर्कपञ्चाननोपाधिकोऽपरपण्डितविशेषः । अयं हि विवादभङ्गार्णवसेतु-रामचरितादिग्रन्थानां प्रणेता । पितास्य रुद्रदेवः माता च अम्बिका। रुद्रदेवस्तु चतुःषष्टितमवयसि पूर्व्वसहधर्म्मिण्यां ससुतायां मृतायां संसारविरक्तः काशीवाससुखमभिलषन् चिरसुहृदं नित्यानन्दपुरनिवासिनं ज्योतिर्विद्याविशारदं सुप्रसिद्धं चन्द्रशेखरवाचस्पतिमभिगम्य स्वीयान्तिमदशाफलाफलं पृष्टवान् । चन्द्रशेखरस्तु रुद्रदेवस्य जन्मलग्नानुसारतश्चरमे वयसि सुप्रसिद्धपुत्त्रलाभरूपं शुभफलमवगम्य वासुदेवनाम्नः कस्यचिद् विप्रवरस्याम्बिकानाम्नीं कन्यामुदाहयामास। रुद्रदेवस्तु ज्योतिर्विद्यापारदर्शिनश्चन्द्रशेखरस्य वाक्यादम्बिकां परिणीय सत्पुत्त्रप्राप्तिकामो काशीमभिगम्य विश्वेश्वरमुद्दिश्यैकविंशतिपुरश्चरणं कृतवान्। चरमपुरश्चरणदिवसीययामिन्याः शेषयामे प्राप्तसत्पुत्त्रलाभस्वप्नः प्रहृष्टमनाः पुनः स्वस्थानं त्रिवेणीप्रदेशं प्रत्यावृत्य गार्हस्थ्यधर्म्मानुरक्तो बभूव । अथ गच्छति काले पतिपरायणाम्बिका गर्भमुपलभ्य १६१६ शके(११०१परिमितवङ्गाब्दे) सौराश्विनस्य देवीपक्षीयषष्ठ्यां पुत्त्ररत्नं जगन्नाथं प्रसूतवती। रुद्रदेवस्तु नवजातपुत्त्रस्य जातसंस्कारादिकं विधाय राश्यनुसारतो रामराम इति नाम चक्रे परं कुमारस्य मातामहो वासुदेवः अस्मिन्नेव समये श्रीजगन्नाथक्षेत्रात् तीर्थस्थानात् प्रत्यावृत्य दौहित्रमुखं दृष्ट्वा जगन्नाथ इत्याख्ययैनमयोजयत्। ततः प्रभृत्येवायं जगन्नाथ इति नाम्ना प्रसिद्धोऽभूत् ।

अयन्तु बाल्यावस्थायामतीवचञ्चलप्रकृतिर्दुर्दान्तोऽपि स्मृतिशक्तिसत्यवादितादिगुणनिकरेण बहूनां नितरां प्रियपात्रमासीत् । अयं प्रथमतः पितृसन्निधाने व्याकरणमधीत्य ततो ज्येष्ठतातस्य न्यायालङ्कारोपनामकस्य भवदेवस्य समीपे साहित्यादिकमधीतवान् । ततो भवदेवस्य परलोकप्राप्त्यनन्तरं कामालपुरनिवासिनं रघुदेवविद्यावाचस्पतिं अध्यापकत्वेन स्वीकृत्य दर्शनशास्त्रादिचिन्तया कालं यापयामास। अस्य एतादृशी प्रखरा स्मृतिशक्तिरासीत् यदनधीतस्यापि भिन्नदेशीयभाषायां निबद्धस्य ग्रन्थस्य द्वित्रिपत्राणि एकवारमात्रमाकर्ण्यैवायं अनर्गलं अभ्रान्त इव आवर्त्तयितुं समर्थः । एतादृशीमेधाशक्तिरेवैनं अल्पसमयेन बहुशास्त्रपारयायिनमकरोत् ।

पञ्चदशवर्षसमय एवासौ द्रौपदीनाम्नीं सुलक्षणां कन्यामुपनीतवान् । विवाहात् परमेवास्य ज्येष्ठतातो भवदेवः परलोकं गतः । माता तु पूर्व्वमेव कालधर्म्ममुपगता पिता च चतुर्व्विंशतिवयस्कमेनमवलोक्यैव इह लोकं तत्याज। पितृवियोगानन्तरमेवायं छात्रानध्यापयितुं प्रवृत्त आसीत्।

अथ कदाचित् वर्द्धमानाधिपतिर्महाराजत्रिलोकचन्द्रवाहादुरोऽस्य पाण्डित्यप्रभावमवगम्य राजसभामधिरोहयितुं निमन्त्रयामास । जगन्नाथस्तु राजप्रसादमुपलब्धुं राजसभां प्रविश्य तर्कजालेन तत्रस्थान् पण्डितान् जितवान् । महीपतिस्तु जगन्नाथस्य तादृशीं बुद्धिशक्तिं मेधाशक्तिञ्चावलोक्य विशेषेण परीक्षितुं पथि दृष्टस्य समग्रवस्तुनो वार्त्तां विज्ञापयितुमादिदेश । जगन्नाथस्तु नृपतेर्मनोऽभिप्रायमवगम्य त्रिवेणीप्रदेशात् वर्द्धमानपर्य्यन्तं यावत् पथि स्थितानां प्रत्येकपादपमन्दिराणामपि वृत्तान्तं कथयामास। राजा तु स्वकर्म्मचारिभिरेतद्वृत्तान्तस्य याथार्थ्यमुपगम्य सातिशयेनानन्दितो बभूव ।

एकदा मुर्शिदावादाख्यप्रदेशनृपतेर्यवनस्य मन्त्री नन्दकुमारोऽस्य पाण्डित्यमवगम्य (नवाब) महीपतिसमीपमेनमानयामास। नृपतिस्तु बहुविधैर्दुरूहप्रश्नैरेनं वञ्चयितुमभिललाष परं जगन्नाथः स्वीयबुद्धिप्राखर्य्येण नृपतिकृतप्रश्नानां सदुत्तरं दत्त्वा तं सन्तोष्य च तस्माद् बहुलार्थप्रदां भूम्यादिसम्पत्तिं लब्धवान् ।

अथ कालचक्रगत्यनुसारतो यवनराजानां वैभवरविरस्तं गतः इंराजराजानां सौभाग्यसमयः समुपागतश्च। तदा इंराजनृपतयस्तदानीन्तनप्रजारञ्जनार्थं विचारकार्य्यस्य सौकर्य्याय जगन्नाथतर्कपञ्चाननं समाहूय व्यवहारोपयोगिनं ग्रन्थमेकं प्रणेतुमादिदेश । जगन्नाथस्तु नवीननृपतिभिस्तथादिष्टः“विवादभङ्गार्णवसेतु-” नामकं ग्रन्थं प्रणीतवान् ।

अस्य द्विषष्टितमवयसि सहधर्म्मिणी द्रौपदी बहुपुत्त्रपौत्त्रादिकं संरक्ष्य परलोकं गता। अस्य द्वौ पुत्त्रौ तिस्रः कन्याश्चाभवन्। पुत्त्रयोर्घनश्यामसार्व्वभौम एव ज्येष्ठः प्रतिभाशाली बहुशास्त्र-